Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथरामपंचदशीसटीकप्रारंभः

॥पश्चिमदेशाभरणश्रीमद्दयहरपुरासजन्मायम्॥ श्रीकाशीपुरवासीलक्ष्मीनारायणः कविर्ज्जयति ॥ १ ॥

For Private and Personal Use Only



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ स्वस्तिश्रीगणपतयेनमः ॥वज्राम्भोजयवध्वजेन्दुकुस्कमच्छत्राणिजम्बूदरौ वेदीपर्वतकुण्डलाङ्कदगदाकुंभत्रिकोणानिच॥चक्रस्वस्तिककङ्कणाङ्कुशरथप्रोर्ष्वीधनुर्न्नागकोणानि श्रीधरणीसुतापतिपदोर्ल्लक्ष्माणिवन्दामहे॥१॥लोकाम्बाकमलालयापरिवृढप्रोक्तावनीनंन्दिनी वक्त्राम्भोजचकोरपञ्चदशिकाविक्तिङ्कलापालिकाम् ॥ सीताभृच्चरणःकरोतिमधुरश्रीरामनामावली मत्तोःनम्बरशम्बरारिदहनः स्तानृमत्सहायःशिवः॥ २ ॥अथेहवेदोन्तरनीलकण्ठ ३शार्दूलविक्रीडितवृन्तरत्नैः

ओम्॥ शान्ति न्दान्तिमुदारताञ्चदधतः श्वासोर्द्धरोधक्षमास्त्यक्त्वा
नृकलत्रपुत्रस्कन्द्दोभस्माङ्करागोज्ज्वलाः॥भूभृत्कन्दरकेतनास्सुमनयो-
यस्मिन्नूरमन्तेमुदाविश्वस्मिन्नूरमनेचयोहृदिसमेरामस्समुद्भासनाम्॥१॥

स्तवीतिरामंशिवधामलक्ष्मीनारायणस्सत्कविचक्रवर्त्ती॥ ३ ॥ पद्येनैवात्रसार्थेनपद्यावतरणम्या ॥प्रीतयेरामचन्द्रस्यप्रतिपद्यंविलिरव्यते ॥ ४ ॥भारतीभल्लकारामेविन्मल्लास्सनकादयः॥रमन्तेरमतेरामोऽप्यत्रेत्याहादिमेकविः॥ ५ ॥ ॥ अथव्यारव्या ॥ ॥शान्तिमिति ॥सनिगमागमादिप्रसिद्धोवाङ्मनसागोचरः॥स्वेच्छयादाशरथित्वेनजायमानोरामः ॥मेमम॥ हृदिअन्तःकरणे ॥समुद्भासतामित्यन्वयः॥कार्मदिनिविडान्धकारच्छन्नम् ॥ममस्वान्तमुद्दीपयत्वित्यर्थः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

॥ यद्वा ॥ समुदितिभिन्नम्पदम् ॥ समुत्सप्रीतिः ॥ सवात्सल्यस्सन्नित्यर्थः ॥ भासतामितिनुपू-
र्ववत् ॥ योयत्रतिष्ठति ॥ सतत्रोद्भासनङ्करोत्येव ॥ श्रीरामस्यहृदयनिलयत्वन्तुस्फुटमेव ॥ ईश्वर
स्सर्वभूतानांहृद्देशेऽर्ज्जुनतिष्ठतीतिभगवद्वचनात् ॥ भजन्तियेत्वाममलात्मनांसतान्तेषांहृदब्जे
सहसीतयावसेतिमुनिसिंहवचनाच्च ॥ नच॰रामस्यस्वान्तोद्भासने ॥ करणापेक्षा ॥ तस्यैवहृषी
केशत्वात् ॥ नहिदीपदर्शनकृतेऽपरोदीपउद्दीप्यतेयथादीपोऽन्धकारगतघटपटादीनुद्भासयति
॥ स्वयमप्युद्भासते ॥ एवमेवश्रीरामइन्द्रियगणानुद्भासयति ॥ नतेनमुद्भासयितुमलमितिनि
ष्कृष्टोऽर्थः ॥ तथाचवासुदेवगर्भस्तुतौवसुदेवोक्तिः ॥ एवम्भवानबुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गु-
णैस्सन्नपितद्गुणग्रहइत्यादि ॥ सकः ॥ यस्मिन् ॥ सुमतयोयोगिनः ॥ सनकाद्याः ॥ मुदाआन
न्देन ॥ रमन्ते ॥ सर्वभूतात्मतया ॥ धारणाङ्कुर्वन्ति ॥ यश्च ॥ विश्वस्मिन् ॥ जगति ॥ सर्वस्मिंश्च
राचरात्मकेभूतवर्गेवा ॥ रमते ॥ सः ॥ कर्त्रधिकरणरूपेण ॥ द्विधाहिरामशब्दव्युत्पत्तिः ॥ त-
थाचोक्तम् ॥ रमन्तेयोगिनोयस्मिन्सत्यानन्देचिदात्मनि ॥ इतिरामपदेनासौपरब्रह्माभिधीय
ते ॥ इति ॥ रमन्तेयोगिनोयस्मिन्नित्यत्राधिकरणेघञ् ॥ इतरत्रकर्तरि ॥ अत्ररामशब्दस्यव्यु
त्पत्तिः ॥ अधिकरणप्रत्ययान्तपरैव ॥ ननुकर्तृप्रत्ययान्तपरेतिराधान्तः ॥ अकर्तरिचकारकेस
ञ्ज्ञायामितिपाणिनीयसूत्रात् ॥ कर्तृभिन्नेकारकेघञ्विधानात् ॥ परन्त्वत्र ॥ यथा ॥ अकर्त्त १

For Private and Personal Use Only

के

रिच्चकारसञ्ज्ञायामितिसूत्रे॥सञ्ज्ञायामित्यस्यप्रायिकत्वम्॥ एवंविनिगमनाविरहात्॥
सञ्ज्ञायामित्यस्यप्रायिकत्वे॥अकर्तरीत्यस्याप्रायिकत्वेऽपिमानाभावात्॥अकर्तरीत्यस्या-
पिप्रायिकत्वम्॥ तेन॥ विश्वस्मिन्॥रमतइतिरामइतिसिद्धम्॥ यद्वा॥कर्म्मणोऽधिकरण
विवक्षया॥ विश्वस्मिन्॥रमतइतिरामइतिज्ञेयम्॥ यद्वा॥बाहुलकात्कर्तरिघञिरामपदं
साधनीयम्॥ तथाच॥वाल्मीकिरामायणे॥बालकाण्डे॥ द्वितीयेसर्गे॥ बाल्मीकिम्प्रति॥
ब्रह्मदेववचनम्॥रामस्यचरितङ्कृत्स्नङ्कुरुत्वमृषिसत्तम॥ धर्मात्मनोभगवतोलोकेरामस्यधी
मतइति॥ अथचैतदुपरि॥टीकाकारोरामः॥ लोकेरामस्य॥रमनइतिरामः॥ बाहुलका
त्॥ कर्तरीघञ्॥ तेनलोकाधिष्ठातुर्ल्लोकान्तर्य्यामिणश्चेत्यर्थः॥ इत्यलम्॥ कीदृशास्ते॥शा
न्तिर्दान्तिमुदारताञ्च॥दधतोदधानाः॥दधतइत्यत्र॥नाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः
॥ अत्रशान्तिराभ्यन्तरेन्द्रियनिग्रहः॥दान्तिर्बाह्येन्द्रियनिग्रहः॥ तदुक्तमार्य्यैः॥ आभ्यन्त
राणांबाह्यानामिन्द्रियाणाञ्चनिग्रहः॥ शान्तिर्दान्तिरुभेप्रोक्तेमुनिभिस्तत्वदर्शिभिः॥
इति॥ उदारतावचनादावक्लैब्यम्॥ २ ॥पुनः॥श्वासानाम्प्राणवायूनाम्॥ऊर्द्ध्वरोधेकुम्भ
के॥क्षमासामर्थ्यम्॥ अस्त्येषान्ते तथोक्ताः॥ मत्वर्थीयोऽजत्र॥यद्वा॥क्षमन्तइतिक्षमाः
॥श्वासोर्द्ध्वरोधेकुम्भकप्राणायामेक्षमास्समर्था इत्यर्थः॥पुनः॥ त्यक्ताश्चात्रादयोयैस्ते

॥ तत्र॥ भ्रातरस्सोदर्य्याः ॥ कलत्रन्दाराः ॥पुत्राऔरसाः॥ स्कत्हदोहितकराः॥पुनः॥भस्मै
वाङ्गरागोविलेपनम् ॥ तेन ॥ उज्ज्वलादेदीप्यमानाः ॥परित्यक्तनिरयनिदानस्रक्चन्दनादिभो
गाइत्यर्थः ॥ पुनः ॥ भूभृताम्पर्वतानाम् ॥ कन्दरादर्य्यः ॥ तएवकेतनानिगृहाणियेषान्तेत
थोक्ताः ॥दरीतुकन्दरोवास्त्रीत्यमरः ॥केतनन्तुनिमन्त्रणे॥ गृहेकेतौचकृत्यइतिमेदिनी
॥ अत्रशान्तिपर्वणिभीष्मः ॥ यमैश्चनियमैश्चैवतथाचासनबन्धनैः॥ प्राणायामैस्सुतीक्ष्णै
श्चप्रत्याहारैश्चसन्ततैः ॥ १ ॥ धारणाभिस्तथाध्यानैस्समाधिभिरतन्द्रिताः ॥ रागद्वेषवि
निर्म्मुक्ताज्ञानविध्वस्तकल्मषाः ॥ २ ॥शाकमूलफलाहारास्सन्तुष्टास्समदर्शिनः ॥भज
न्तेमुनयोरामङ्गिरिकंदरकेतनाः॥ ३ ॥ इति ॥ अत्रपञ्चभिर्विशेषणैः ॥ मन्त्रब्रह्मजपास
क्तमनसाम्॥ पञ्चभूतजनितकलेवराभावोदर्शितः ॥ मन्त्रब्रह्मेत्यस्यायमर्थः ॥मन्तार
मनुसन्धातारन्त्रायन्तेरक्षन्तीतिमन्त्राः ॥ मन्त्रेषुब्रह्ममन्त्रब्रह्म ॥ श्रीमत्तारकाख्यम् ॥
तज्जपआसक्तंमनोयेषान्तेषाम् ॥ तज्जपविधिश्शाण्डिल्यादिभिरुक्तः ॥ सयथा ॥ अ
स्यश्रीरामषडक्षरमन्त्रस्य ॥वन्हिबीजादेः ॥ ब्रह्मऋषिः ॥ गायत्रीछन्दः ॥ श्रीरामोदेव
ता ॥चतुर्वर्ग्गसिद्ध्यर्थश्रीरामप्रीत्यर्थेजपेविनियोगः ॥ शिरसिब्रह्मऋषयेनमः ॥ मुखेगा २
यत्रीछन्दसेनमः ॥ हृदिश्रीरामदेवतायैनमः ॥ रामङ्गुष्ठाभ्यांनमः ॥ रीन्तर्ज्जनीभ्यांस्वाहा

॥ रूंमध्यमाभ्यांवषट् ॥ रैंमनामिकाभ्यांहुम् ॥ रौंकनिष्ठिकाभ्यांवौषट् ॥ रः करतलकरपृ
ष्ठाभ्याम्फट् ॥ इतिकरन्यासः ॥ रांहृदयायनमः ॥ रींशिरसेस्वाहा ॥ रूंशिखायैवषट् ॥ रैंक
वचायहुम् ॥ रौंनेत्राभ्यांवौषट् ॥ रः अस्त्रायफट् ॥ इतिहृदयादिन्यासः ॥ अथध्यानम् ॥
कालाम्भोधरकान्तिकान्तमनिशंवीरासनाध्यासितंमुद्राञ्ज्ञानमयीन्दधानमपरंहस्ताम्बु-
जञ्जानुनि ॥ सीताम्पार्श्वगतांसरोरुहकरांविद्युन्निभांराघवम्पश्यन्तंमुकुटाङ्गदादिवि
विधाकल्पोज्ज्वलाङ्गम्भजे ॥ १ ॥ अथप्राणायामाः ॥ तत्रवायोरादानेपूरकेमन्त्रादिबीज
स्य ॥ षोडशकृत्वोजपः ॥ धारणेकुम्भकेचतुष्षष्ठिकृत्वोजपः ॥ त्यागेरेचकेद्वात्रिंशत्कृत्वो
जपः ॥ ततोमन्त्रस्याष्टोत्तरशतादिजपः ॥ रंरामायनमइतिमूलमन्त्रः ॥ ततः करेजलमादा
य ॥ कमलाकारन्ध्यात्वा ॥ गुह्यातिगुह्यगोप्तात्वङ्गृहाणास्मत्कृञ्जपम् ॥ सिद्धिर्भवतुमेदेव
त्वत्प्रसादाद्रघुरेश्वर ॥ १ ॥ इतिपठित्वा ॥ देवदक्षकरेजलङ्क्षिपेत् ॥ इतिमन्त्रब्रह्मजपविधिः ॥
अनेन ॥ आदिमश्लोकेन ॥ श्रीरामस्य ॥ वसन्तिसर्वाणिभूतानियस्मिन् ॥ सवासुः ॥ दीव्य
न्तिक्रीडन्ति ॥ योगिनोयस्मिन्सदेवः ॥ वासुश्चासौदेवश्चेतिवासुदेवः ॥ तस्यभावस्तत्त्व
म् ॥ इत्यर्थानुसन्धानेन ॥ वासुदेवत्वम्प्रतिपादितमित्युपरम्यतेऽस्माभिः ॥ अलमतिवि
स्तरेण ॥ १ ॥ श्रीरामोभजताम्भर्तासंहर्त्ताजगदापदाम् ॥ भुक्तिमुक्तिप्रदस्त्वेषा माहेत्म्यंसो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽत्रसत्कविः ॥१॥ श्रीमन्निति ॥ हेश्रीमन् ॥ हेराम ॥ स्वेषामात्मीयानाम् ॥ जनानांसेवकाना
म् ॥ भृशमतिशयेन ॥ त्वम् ॥ भर्त्तापोषकोऽसीत्यन्वयः ॥ श्रयतिहरिमितिश्रीः ॥ श्रिञ्सेवा
याम् ॥ क्विब्वचीतिकिब्दीर्घौ ॥ साश्रीरत्र ॥ राघवत्वेऽभवत्सीतारुक्मिणीकृष्णाजन्मनीतिवि
ष्णुपुराणवचनात् ॥ मैथिल्येव ॥ सानित्यम् ॥ अस्यास्मिन्वाऽस्तीतिश्रीमान् ॥ नित्ययोगे
मतुबत्र ॥ यद्वा ॥ श्रीस्त्रीवर्गसम्पत्तिः ॥ लोकोत्तरशोभादिकंवा ॥ अस्ति ॥ अस्यास्मिन्वा

श्रीमन्रामभवोग्रभीतिविलसत्सद्भावभङ्गोन्दुर प्रोद्यद्भ्रान्तिभराभि-
भावनरतस्वेषाञ्जनानाम्भृशम् ॥ त्वम्भर्त्ताऽसिमहानुभावभजताम्भु
क्तिप्रदोमुक्तिदोभूयात्संसृतिहारिणीममहृदित्वद्भक्तिरेवाऽनिशम् ॥२॥

॥ सश्रीमान् ॥ नदामंत्रणे ॥ हेश्रीमान् ॥ शश्वद्धृदयस्थ जानकीक ॥ त्रिवर्गस
म्पत्यादिनिधान ॥ वा ॥ श्रीर्वेशरचनाशोभाभारतीसरलद्रुमे ॥ लक्ष्म्यान्त्रिवर्गस
म्पत्तिविधोपकरणेषुच ॥ विभूतौचमतौचस्त्रीतिमेदिनी ॥ अत्रगणेशविद्वांसः ॥ यस्यहृदे
ऽवनिजाताजातुनयातु ॥ विश्वनाथविश्वाद्यस्सत्वाम्पातु ॥१॥ रामभवेत्येकम्पदंवा ॥ नत्र ॥ ३

रामश्चरामश्चरामौ ॥ परशुधरहलधरौ ॥ अत्रैकशेषः ॥ तयोर्भवोजन्मयस्मात् ॥ तत्सम्बुद्धौ ॥ हेरामभव ॥ दशरथेरवनारित्वात् ॥ तावेतदशावेव ॥ यद्वारामयोर्भवः क्षेमंयस्मात् ॥ तत्सम्बुद्धौ ॥ रामनाम्नैवतयोर्विजेतृत्वप्रतीरितिभावः ॥ भवः क्षेमेशसंसारेसत्तायाम्प्राप्तिजन्मनोरितिमेदिनी ॥ यद्वारामस्यभवोजन्मयस्मात् ॥ सरामभवो दशरथः ॥ दशः पक्षीविहङ्गमइतिकोशात् दशः पक्षी ॥ अर्थाद्गरुडः ॥ सरथइवयस्येतिसमासाश्रयणेनगरुडध्वजेतिसम्बुद्धिः ॥ यद्वा ॥ रामाद्भवोजन्मयस्य ॥ कुशलवरूपस्यपुत्रद्वयस्य ॥ आत्मावैजायतेपुत्रइत्युक्तेः कुशलवरूपिभिरित्यर्थः ॥ यद्वा ॥ रामस्यसकलजनाल्हादस्यभवउत्पत्तिर्यस्मात् ॥ तन्मूलैवलोकनिर्वृतिरितिभावः ॥ रामोमृगेदाशरथावितिकोशात् ॥ रामोमृगोमारीचाख्यः ॥ तस्यभवः ॥ क्षेमंमुक्तिलक्षणंयस्मात् ॥ तत्सम्बुद्धिः ॥ अत्रान्येऽप्यर्थाबुद्धावुल्लसन्ति ॥ विस्तरभयेननलिख्यन्ते ॥ उग्रभीतिविलसन् ॥ उग्रस्यशिवस्य ॥ भीतौ ॥ वृकासुरजनितपार्वतीहरणरूपेभये ॥ विलसति ॥ मायाबटुरूपेण ॥ तादृशः ॥ सकललोकशङ्करमपिशङ्करं वृकासुरानुद्रुतन्दृष्ट्वा ॥ मायाबटुरूपेण ॥ तद्भस्मसात्करणपूर्वकन्तद्भयमोचनञ्चकारेत्यर्थः ॥ इतिभागवतादौप्रसिद्धतरमेव ॥ यद्वा ॥ उग्राणाङ्क्रूराणाम् ॥ सर्पाणामितियावत् ॥ भीतिर्भयम् ॥ यस्मात्त्वभक्षकात् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रा॰ सच्चासौ ॥ विः पक्षीगरुडः ॥ तेनगरुडेननिजवाहनेन ॥ लसतिक्रीडतिस्वैरयात्रादौ ॥ पं॰
४ सत्तादृशः ॥ क्रूरशङ्करयोरुग्रइतिनाममाला ॥ सच्चासौ ॥ सद्भावः ॥ सतांभावोभक्तिर्य-
स्मिंस्तादृशः ॥ यद्वा ॥ सतोऽनन्यान्निजभक्तान् ॥ भावयति ॥ स्वस्मिन्सच्चिदानन्दैकरसस्व
रूपे ॥ मेलयतीति ॥ तादृशः ॥ भूमिश्रणे ॥ यद्वा ॥ सत्सुब्रह्मादिषु ॥ भातिसर्वोत्कर्षेणप्रकाश
ते ॥ इतितादृशः ॥ औणादिकोवप्रत्ययः ॥ यद्वा ॥ सतोसर्वोत्कृष्टाभार्दीप्तिर्येषान्तेसद्भाः ॥ मार्त्त
ण्डादयः ॥ तान् ॥ अवतिरक्षति ॥ राक्षादिभ्यइतितादृशः ॥ तत्सम्बोधनम् ॥ पुनः ॥ भङ्गो
ङ्कुर ॥ भङ्गेसंहारे ॥ उङ्कुरउद्यतः कालरूपेणेतितादृश ॥ राजेन्द्र तवपुत्रोऽहं सर्वसंहारकार
क इतिकालोक्तेः ॥ पुनः ॥ प्रोद्यन्भ्राजिष्णुः ॥ सच्चासौ ॥ श्रीरामस्यप्रोद्यत्त्वंनारायणावता
रत्वेनभानुवंशोद्भवत्वेनवासुघटमेव ॥ यद्वा ॥ प्रोद्यन्तीप्रकर्षेणाविर्भवन्तीयाभ्रान्तिः ॥
तस्याभराभिभावने ॥ संसारैकनिदानतदतिशयनिर्मूलने ॥ रतोऽतीवबद्धपरिकरस्सः
॥ तादृश ॥ उत्तरोत्तरमत्रकर्मधारये विहितेवा ॥ एकैवसम्बुद्धिरवसेया ॥ यद्वा ॥ भवेत्यादि
रतान्तमेकमेवसम्बुद्ध्यन्तम्पदम् ॥ तत्र ॥ भवस्यसंसारस्य ॥ उग्राकरालाया ॥ भीतिर्ज्ज
ननमरणभयम् ॥ तया ॥ विलसन्ती ॥ संश्लिष्टाचञ्चन्तीवासद्भावभङ्गोङ्कुरा ॥ साधुज्ज ४
नतापहरणोद्यता ॥ याप्रोद्यन्तीसर्वतः प्रसरन्ती ॥ भ्रान्तिर्देहात्मविपरीतज्ञानलक्षणा ॥

For Private and Personal Use Only

तस्याभराभिभावने॥ तद्वेगातिशयतिरस्करणोरतस्तत्सम्बुद्धौ॥ यद्वा॥भवाघ्रुन्दुरा
न्तम्॥भोद्यदादिरतान्तश्चेतिपदद्वयम्॥ तत्र॥भृशमत्यर्थम्॥स्वेषामनन्यगतिकानाम्
॥जनानांनिजभक्तजनानामितियावत्॥भवस्यजन्ममरणाद्यात्मकस्यसंसारस्य॥उग्रा
ऽतिदुस्सहा॥भीतिर्भयम्॥तस्याः॥यः॥विलसन्नतिप्रौढतयाभासमानः॥सद्भावोऽनुभ
वसिद्धासंस्फूर्तिः॥ तस्य॥भङ्गे वेदान्तैकप्रतिपाद्याखण्डैकरसात्मावबोधविधायित्वे

क्रव्यादाधिपतेरुपद्रवरतेर्विख्याततेजस्ततेः कैलासाचलचालकस्यावि
बुधस्थामाभिमानच्छिदः॥ मायोग्रस्यदशाननस्यकुधियस्त्वंयान्दशां
संव्यधामम्मोहोद्धतरक्षसःकुरुदशांश्रीरामतांसत्वरम्॥ ३ ॥ ॥

न॥निश्शेषतयाविनाशने॥उद्धुरः प्रौढतरः॥सः॥तत्सम्बुद्धिः॥ अतएव॥भोद्यन्तीनिवा
रयितुमशक्यतया॥उत्तरोत्तरंवर्धमाना॥याक्षान्तिरतत्वेतत्वनिश्चयविशेषः॥ तस्याः॥भो
भरोऽतिशयः॥अतिशयोभरइत्यमरः॥तस्याभिभावनेऽतितिरस्करणे॥रतोरसिकस्तत्स
म्बुद्धिः॥पुनः॥महानुभाव॥ महानतुलः पूज्योवा॥अनुभावः॥प्रतापोयस्य॥ तादृश॥
भजतांस्वसेविनाम्॥भर्तास्वामी॥सर्वानर्थनिवारकत्वेनधारयितेतियावत्॥ अतराव॥

रा· पं·
५

भुक्तिप्रदः॥इहानेकविधभोगप्रदाता॥मुक्तिदः परत्रसालोक्यादिपंचविधमुक्ति प्रदोऽसित्वमे
वासि॥अतएव॥संसृतिहारिणीसंसारनिर्म्मूलिनी॥त्वद्भक्तिः॥मम॥ हृदि॥अनिशंसर्वदा॥
भूयादितिप्रार्थनाकवेः॥२॥दशकण्ठकुलध्वंसीमोहरावणरावणः॥श्रीरामएवनान्योऽस्ती
त्याहपद्येतृतीयके॥१॥क्रव्यादेति॥हेश्रीराम॥त्वम्॥मन्मोहोन्द्धतरक्षसः॥सत्वरंशीघ्र
म्॥तान्दशामवस्याम्॥कुर्वित्यन्वयः॥ममसोहोऽविवेकविलसितविशेषः॥सएवोद्धतरक्षः
उद्भटजातुधानः॥तस्य॥अर्थसम्यद्विमोहायथिमोहोनरकायचेतिभारतोक्तेर्मोहस्यदुर्गतिप्रदत्वेन
राक्षसत्वारोपः॥नाङ्काम्॥दशाननस्यरावणस्य॥सपरिवारनिर्मूलनरूपाम्॥यान्दशा
म्॥त्वम्॥संव्यधाः कृतवान्॥कीदृशस्यतस्य॥क्रव्यंमांसम्॥अदन्तिभक्षयन्तीति॥
क्रव्यादाराक्षसाः॥कर्मण्यण्॥तेषाम धिपस्यस्वामिनः॥अनेन॥नृशंसत्वमुक्तम्॥पुनः
कीदृशस्य॥उपद्रवेसकललोकोपप्लवे॥रतिः [illegible] प्रीतिर्यस्यतस्य॥अनेन॥अतीवदुर्ज्ज
नत्वमुक्तम्॥पुनः की०॥विख्याताभुवनत्रयसुप्रसिद्धा॥तेजसान्त्रिजगद्विजयजीवातू
नाम्प्रतापानाम्॥ततिःपरम्परायस्यतस्य॥ अनेन॥इन्द्रादीनामपि॥दुस्सहदुःखप्रद
त्वंसूचितम्॥पुनः की०॥कैलासम्॥त्रिभुवनगुरोः॥श्रीमहादेवस्य॥निवासस्थानम्॥ ५
कैलासनामकम्॥अचलमपि॥चालयति॥निजभुजतोलनार्थम्॥कम्पयतीतितस्य॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेन॥ लोकोत्तरमदाविष्टत्वमुक्तम् ॥पुनः की०॥ विबुधानान्देवानाम् ॥ ग्रामस्समूहः
॥अमरावतीनामकंनगरंवा॥ तस्याभिमानन्दुर्ज्जय्यत्वगर्वम् ॥अन्यत्र॥ दुर्द्धर्षत्वदर्प्पम्॥
च्छिनत्तीतितस्य।क्विप्॥अनेनातीववीरत्वमुक्तम् ॥ पुनः की०॥ माययानानाविधरूप-
धारणादिच्छलेन॥उग्रस्यघोरस्य॥अनेन॥अतिभीमत्वमुक्तम् ॥ पुनः की०॥ कुत्सितापर
रस्त्रीहरणादिरूपा।धीर्यस्यतस्य॥अनेन॥अतिकामुकत्वमुक्तम् ॥अत्रसप्तभिर्विशेषणैः

रामोमावतु नौमिराममनिशंरामेणविश्वन्ततंरामायार्प्पितमस्तुसर्व
मपिमेरामान्नतिर्लभ्यते॥ रामस्यैवभवानिकिङ्करतरोरामेस्तुभक्ति
र्म्ममश्रीदोमेभवरामधामपरमम्भासीहमेसम्पदाम् ॥ ४ ॥ ॥

सप्तद्वीपनिवासिनाम्पीडाकरत्वमुक्तम् ॥नहीदृग्रावणसमूलनिर्म्मूलकस्यतव॥मन्मोह
रक्षोविघातेप्रयासइतिसूचितम् ॥यावद्रामकृपाकटाक्षमधुराम्भोदृष्टिसिक्तानैवस्युर्ज्ज
नाः॥ तावन्मोहनिगडान्नमुच्यन्तइतिभावः॥ ३॥ समस्तंवाङ्मयंव्याप्तंसम्पदामपिस
म्पदा॥ त्रैलोक्यमिवरामेणेत्याहपद्येचतुर्थके ॥ १ ॥ रामइति।रामः॥मामाम् ॥अवत्तुरक्ष
तु॥संसारदुःखादितिशेषः॥त्वामौद्वितीयायाइतिमामित्यस्य॥मेत्यादेशः ॥श्रीशस्त्वाऽव

For Private and Personal Use Only

रा· तुमापीहेत्यादिवत् ॥ अनिशंनिरन्तरम् ॥ रामम् ॥ अहम् ॥ नौमिस्तौमि ॥ नान्यम् ॥ रमण ॥ पं·
६ विश्वंसर्वच्चराचरात्मकज्जग त् ॥ ततंस्वसत्तया ॥ व्याप्तम् ॥ मेमम ॥ सर्ववस्तु ॥ स्वत्वभ्रस्तमा-
त्रम् ॥ रामायार्प्पितम् ॥ अस्तु ॥ मयेतिशेषः ॥ रामात् ॥ गतिर्म्मोक्षरूपा ॥ भक्तैर्ल्लभ्यतेप्राप्यते
रामस्य ॥ किङ्करतरोदासानुदासः ॥ अहम् ॥ भवानि ॥ रामे ॥ मम ॥ भक्तिरव्यभिचारीभावः ॥
अस्तुभवतु ॥ नान्यत्किमपिवाञ्छामि ॥ हेश्रीराम ॥ मेमम ॥ श्रीदोमोक्षैकसाधनत्रिवर्गसम्प-

**श्रीमान्दाशरथिर्म्मुनीष्टशरणङ्कोदण्डभङ्गोद्धताः प्राप्तोर्वीतनयोनृपान्न**
**काज**[illegible]**ताताभ्यनुज्ञाकरः ॥ सीतालक्ष्मणासेवितोवनगतोरक्षोहतप्रेय**
**सीसुग्रीवामरष्भूमिजाधिभरतत्साकेतराट्पातुनः ॥ ५ ॥ ॥ ॥**

त्सदोभव ॥ यतः ॥ सम्यदांषड्विधैश्वर्यसमृद्धीनाम् ॥ धामस्थलंनिवासस्थानमितियावत् ॥
त्वमेव ॥ मेमम ॥ भासिप्रतीयसे ॥ अत्रक्रमेणसम्बुध्यन्तसप्तविभक्त्यर्थादर्शिताः ॥ ४ ॥ प
ञ्चमेसप्तकाण्डोक्तंश्रीरामचरितंशुभम् ॥ कविराहसमासेनमहापातकहानये ॥ १ ॥ श्रीमानि-
ति ॥ श्रीमान् ॥ रामावतारस्साक्षाल्लक्ष्मीश्वरोविष्णुः ॥ नोऽनन्यशरणान्निजभक्तानस्मान् ॥ ६
पातुबाह्याभ्यन्तरपटच्चरेभ्योरक्षतु ॥ इत्यन्वयः ॥ सपरिवाराभिप्रायेणबहुत्वम् ॥ कीदृक् ॥ दा

शरथिर्भूपेन्द्रदशरथापत्यरूपेणप्रादुर्भूतः ॥ अतइञ् ॥ पुनः की० ॥ मुनेर्विश्वामित्रस्य ॥ इष्टि र्यागः ॥ इष्टिर्यागस्सवोऽध्वरइत्यमरः ॥ तस्याः ॥ शरणंरक्षकः ॥ शरणङ्गृहरक्षित्रोरित्यमरः ॥ नियतनपुंसकलिङ्गश्शरणशब्दः ॥ एतेन ॥ परोपकारैकप्रवणचित्तत्वंसूचितम् ॥ पुनः की० ॥ कोदण्डस्यत्रिजगदुपद्रवकारित्रिपुरासुरवधैकसाधनत्रिपुरारिपिनाकस्यभङ्गेनखण्डनेन ॥ उद्भूतंसमुद्भूतन्त्रिभुवनप्रसृतमितियावत् ॥ यशः कीर्तिर्यस्यसः ॥ पुनः की० ॥ अतएव ॥ मा सालब्धा ॥ उर्वीतनयाभूमिजा ॥ मैथिलीरूपालक्ष्मीर्येनसः ॥ पुनः की० ॥ नृपाणामन्तकः का- लोभगवानिव ॥ भगवान्भार्गवः ॥ तज्जयतितन्तेजोहरणेन ॥ अधस्तात्करोतीतिसः ॥ ताच्छी ल्येणिनिः ॥ पुनः की० ॥ तातस्यदशरथाख्यस्यपितुः ॥ अभ्यनुज्ञाञ्चतुर्दशसंवत्सरवनवासरू पामाज्ञाम् ॥ करोतिविदधातीतिसः ॥ पुनः की० ॥ सीतालक्ष्मणाभ्यांसेवितोऽनुगतः ॥ पुनः की० ॥ वनगतोदण्डकारण्यादिविपिनविहारी ॥ पुनः की० ॥ रक्षसाराक्षसेन रावणेनेनियावत् ॥ हृता- चोरिता ॥ लङ्कांसमानीता ॥ प्रेयसीप्राणप्रियामैथिलीयस्यसः ॥ बहुश्रेयसीवत् ॥ ङ्यन्तत्वात् ॥ हलङ्याबितिसुलोपः ॥ पुनः की० ॥ सुग्रीवस्य ॥ बालिवधपूर्वकंराज्यप्रदानेन ॥ अमराणामि- न्द्रादीनाम् ॥ रावणकुम्भकर्णमेघनादादिवधेन ॥ भूमिजायास्सीतायास्स्वसमागमेन ॥ आधि भरंमनोव्यथातिशयम् ॥ हरतीतिसः ॥ क्विप् ॥ ह्रस्वस्यपितिकितिनुगितितुक् ॥ पुंस्याधिर्मा

रा० नसीव्यथेत्यमरः ॥ पुनः की० ॥ साकेतराट् ॥ नन्दिग्रामस्थभ्रातृवरभरतैकप्रीतये ॥ अङ्गीकृ पं०
७ नायोध्याधिपत्यइत्यर्थः ॥ विशेषणमहिम्नाअत्र ॥ सकलरामायणार्थस्सूचितः ॥ ५ ॥ ल-
क्ष्मीनारायणः षष्ठेकाशीवासी महाकविः ॥ सुषमाधामरामस्यध्यानमाह माहाऽद्भुतम् ॥ १ ॥
मानवामौलितोवर्ण्यादेवाश्चरणतः पुनरितिकविसम्प्रदायमनुसृत्य ॥ पादादिमुकुटपर्यन्तं व
र्णयन् ॥ श्रीरामचरणाध्यानन्दर्शयति ॥ मञ्जीरेति ॥ अहमनन्यगतिकोलक्ष्मीनारायणाभिधा

मञ्जीरादिविभूषिताङ्घ्रियुगलंसत्पीतपट्टाम्बरञ्चञ्चत्काञ्चनमेखला
ञ्चितकटिंसंशोभिमुक्तास्रजम् ॥ सौवर्णाङ्गदकङ्कणादिकधरंशङ्खोल्ल
सत्कन्धरंनासामौक्तिकशालिनंसुमुकुटंरामङ्गनाभम्भजे ॥ ६ ॥ ॥

नः कविः ॥ रामम्भजे ॥ इत्यन्वयः ॥ कीदृशम् ॥ मञ्जीरादिभिर्नूपुरादिभिः ॥ विभूषितमलङ्कृत
म् ॥ आङ्घ्रियुगलञ्चरण द्वयंयस्यतम् ॥ पादाङ्गदन्तुलाकोटिर्म्मञ्जीरोनूपुरोऽस्त्रियामित्यमरः ॥
आदिनोर्म्मिकादिग्रहः ॥ पुनः की० ॥ सत् ॥ नवीनत्वकनकतन्तुघटितत्वमृदुलत्वकदलीदल
कल्पत्वादिसुगुणरुचिरत्वादनुपमम् ॥ पीतंहरिद्राभम् ॥ पट्टाम्बरङ्कौशेयवसनंयस्यतम् ॥ सं- ७
व्यानोपसंव्यानाभिप्रायेणाद्विवचनान्तानाम्पदानांसमासोविधेयः ॥ चञ्चन्ती ॥ दिव्यनानावि
पुनः की०

धामलमणिगणखचितत्वात् ॥ देदीप्यमाना ॥ या ॥ काञ्चनमेखलास्कवर्णरशना ॥ तया ॥ अञ्चिताशोभिता ॥ कटिः श्रोणिर्यस्यतम् ॥ स्त्रीकट्यांमेखलाकाञ्चीसप्तकीरशनातथा क्लीवेसारसनञ्चेति ॥ कटेनाश्रोणिफलकङ्कटिः श्रोणिः ककुद्मतीतिच्चामरः ॥ पुनः की० ॥ संशोभिनीस्कग्रथितत्वात् ॥ अतिरमणीया ॥ मुक्तास्त्रक ॥ महेभकुम्भनिस्सृतानिस्थूल वर्तुलातिविमलनिर्दोषमहर्घमौक्तिकमालायस्यतम् ॥ पुनःकी० ॥ स्कवर्णस्यैमानीसौव-र्णानिहैमानिअङ्गदकङ्कणादिकानिकेयूरकरभूषणादीनिभूषणानि ॥ धरतीतिधरः ॥ पचाद्यच् ॥ तेषान्धरस्तम् ॥ केयूरमङ्गदंतुल्येइति ॥ कङ्कणाङ्करभूषणमितिच्चामरः ॥ आदि ना ॥ अङ्गुलीयकग्रैवेयककुण्डलप्रभृतीनाङ्गहणम् ॥ पुनः की० ॥ शङ्खइवकम्बुरिव ॥ उल्लसन्ती ॥ अतीवोच्चैश्शोभमाना ॥ कन्धराश्रिरखाग्रीवायस्यतम् ॥ अथग्रीवायांशिरोधिःकन्धरेत्यपीति ॥ कम्बुग्रीवात्रिरेखासेतिच्चामरः ॥ पुनः की० ॥ नासामौक्तिकेन ॥ शालतेशोभतेतच्छीलस्तम् ॥ उपश्रृङ्ग्समन्त्रुरुदधानंनसिमौक्तिकमितिध्यानमालायाम् ॥ क्लीवेघ्राणङ्गन्धवहाघोणानासाचनासिकेत्यमरः ॥ पुनः की० ॥ शोभनम् ॥ मणिमय-त्वहैमत्वादिना ॥ अतीवहृदयङ्गमम् ॥ मुकुटङ्किरीटंयस्यतम् ॥ अथमुकुटङ्किरीटन्नपुंसकमित्यमरः ॥ पुनः की० ॥ घनस्यनवीननीरदस्य ॥ आभेवाभाकलेवरव्यापिनी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीप्तिच्छटायस्यतम् ॥ घनश्याममित्यर्थः ॥ यद्वा ॥ घनाऽनिसान्द्रा ॥ आभा ॥ अमरवरम
णिराशिविजयिनीशरीरकान्तिपरम्परायस्यतम् ॥ यद्वा ॥ घनानामाभायस्मात्तम् ॥ रामस्य
केशान्विदुरम्बुवाहानित्युक्तेः ॥ दाशरथिसुकचश्यामलिम्नैवघनाश्श्यामाइतिभावः ॥ ६ ॥
कल्याणनिलयम्पादं श्रीरामस्यात्रसप्तमे ॥ निरूपयतिसद्भक्त्यालक्ष्मीनारायणस्सुधीः ॥
१ ॥ वज्राम्भोजेति ॥ अहम् ॥ श्रीरामपादम्भजे इत्यन्वयः ॥ कथम्भूतम् ॥ वज्राङ्कुलिशम् ॥

वज्राम्भोजयवादिलाञ्छनभृतं लावण्यसारावधिं शोणाम्भोजतल-
ङ्कमादलनिभं रोचिष्णुगुल्कद्वयम् ॥ उज्जाग्रन्नखपद्मरागकिरणम्पञ्चा
स्यकूर्म्मोपमं सन्मञ्जीरवरोर्मिकं शिवकरं श्रीरामपादम्भजे ॥ ७ ॥ ॥

अम्भोजङ्कमलम् ॥ यवः स्थूलमध्योऽन्नविशेषः ॥ ते ॥ आदौ ॥ आद्यः पूर्ववर्त्तिनोवायेषान्ता
निवज्राम्भोजयवादीनि ॥ लाञ्छनानिचिन्हानि ॥ विभर्त्तीतितथातम् ॥ आदिना ॥ मङ्गलप
द्यदर्शितानिध्वजादीनिज्ञेयानि ॥ पुनः की॰ ॥ लावण्यस्याखिलसौन्दर्यस्य ॥ सारास्स्थिरां
शः ॥ तस्य ॥ अवधिस्सीमा यत्रतम् ॥ अवधिस्त्ववधानेस्यात्सीम्निकालेबिलेपुमानितिमे ८
दिनी ॥ सारोबलेस्थिरांशेन्वेसमरः ॥ पुनः की॰ ॥ शोणाम्भोजवद्रक्तकमलवत् ॥ तलमधो-

भागोयस्यतम् ॥ पुनः कीं० ॥ क्षुमादलनिभम् ॥ तलावशिष्टापरिप्रदेशो ; तासिकाकुसुम-
दलावभासम् ॥ अतसीस्यादुमाक्षुमेत्यमरः ॥ पुनः कीं० ॥ रोचिष्णुदीप्तिमत् ॥ गुल्फयोर्घु
टिर्योः ॥ द्वयंयुगलंयस्यतम् ॥ तद्ग्रन्थीघुटिके गुल्फाविति ॥ विभ्राड्भ्राजिष्णुरोचिष्णूइतिचा
मरः ॥ पुनः कीं० ॥ उज्जाग्रतः प्रस्फुरन्तः ॥ नखपद्मरागकिरणा नखवररूपशोणवर्णमणिवि
शेषमयूखायस्यतम् ॥ किरणः प्रग्रहेरश्मावित्यमरः ॥ पुनः कीं० ॥ पञ्चास्यानिमुखानिय
स्यसचासौकूर्म्मः कच्छपश्चसतथोक्तः ॥ तस्यतेनवा ॥ मांसलपृष्ठत्वाङ्गुलीपञ्चकशोभि
त्वादिना ॥ उपमासादृश्यंयस्यतम् ॥ पुनः कीं० ॥ सन्तौरत्नमयत्वादतीवबन्धुरौ ॥ मञ्जीरौ-
नूपुरौयस्ययस्मिन्वासचासौ ॥ वराअनुत्तमाः ॥ ऊर्म्मिकाअङ्गुलीयकानि ॥ यस्ययस्मिन्
॥ वा ॥ सचतम् ॥ विशेषणयोः कर्म्मधारयः अङ्गुलीयकमूर्म्मिकेत्यमरः ॥ करोतीतिकरः
॥ शिवस्यमङ्गलस्यकरस्तम् ॥ ध्यानमात्रेणसंसारदुःखध्वंसनपूर्वककैवल्यप्रदानकुश
लमित्यर्थः ॥ ७ ॥ विधायराघवश्चित्तेकार्य्यङ्कार्य्यङ्करोतियः ॥ सतत्फलमवाप्नोतीत्य
ष्टमेकविरब्रवीत् ॥ १ ॥ अष्टकेनाथपद्यानांसम्बुन्धन्तांविभक्तयः ॥ श्रीमताकविनासम
दर्शितारामतुष्टये ॥ २ ॥ श्रीरामइति ॥ श्रीरामः ॥ ममलक्ष्मीनारायणस्यकवेः ॥ मानस
मन्तःकरणम् ॥ तत्रवर्ततांसदैवतिष्ठतु ॥ इत्यन्वयः ॥ कीदृक् विधिर्ब्रह्मदेवः ॥ विधि

नौनियतौकालेनिधानेपरमेष्ठिनीतिमेदिनी ॥ वासवोमघवा ॥ तदादयोयेवरुणकुबेरा
दयोदिविषदोदेवाः ॥ तेषाम् ॥ वृन्दानिसमूहाः ॥ तेषाम् ॥ उत्तमाङ्गेषुमूर्द्धसु ॥ उल्लसन्तो-
विस्फुरन्तः ॥ वेल्लन्तौविष्वक्स्वर्णतन्तुभोतत्वात् ॥ नमनक्रियान्वञ्चलमुकुटसंसक्तत्वा
च्च ॥ समुच्चलन्तः ॥ येदिव्यामणयोहीरकादीनिरत्नानि ॥ तैस्स्फुरन्तिदीप्तिमन्तियानिसु
मुकुटानिशोभनकिरीटानि ॥ तैः ॥ स्पृष्टम्प्रणामावसरेनिघृष्टम् ॥ अङ्घ्रिपद्मद्वयञ्चरणार

श्रीरामोविधिवासवादिदिविषद्वृन्दोत्तमाङ्गोल्लसद्वेल्लद्दिव्यमणिस्फुर
त्सुमुकुटस्पृष्टाङ्घ्रिपद्मद्वयः ॥ रम्यानन्तविशालवैभवभरोभक्तैकर
क्षापरोमायामर्त्यतनुस्त्रयीपरिणुतोमन्मानसेवर्त्ततामु ॥ ८ ॥ ॥

विन्दयुगलयस्यसः ॥ पुनः की॰ ॥ रम्योब्रह्मादिभिरप्यतिस्पृहणीयः ॥ अनन्तस्यपरिच्छि-
त्तिभ्रमशून्यस्य ॥ अतएवविशालस्यातिमहतोऽनुपमस्येतियावत् ॥ वैभवस्यैश्वर्य्यस्य
॥ भरोऽतिशयोयस्यसः ॥ यद्वा ॥ रम्यादिविशेषणत्रयविशिष्टोवैभवभरोयस्यसः ॥ पुनः
की॰ ॥ भक्तानांनिजसेवकानाम् ॥ एकस्याद्वितीयायाम् ॥ रक्षायाम् ॥ परआसक्तः ॥ दत्तैक
चित्तः ॥ कालव्यालभयत्रातेत्यर्थः ॥ पुनः की॰ ॥ माययास्वप्रकृत्या ॥ नतुकर्मकलापेन ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मर्त्यं तनुर्म्मनुष्यदेहः ॥वस्तुतस्तुसारव्यात् ॥ ब्रह्मस्वरूपएवेतिभावः ॥पुनः की० ॥अ
तएव ॥त्रय्यावेदत्रयेण॥ परिणुतस्स्तुतः ॥वेदत्रयीप्रतिपादितस्वरूपइत्यर्थः ॥प्रथमा
र्थोदर्शितः ॥५ ॥ तृणीकुर्वन्तिशमनंरामसेवापरायणाः ॥इतिप्रदर्शयामासपद्येऽस्मि
न्भवमेकविः ॥१ ॥अथद्वितीया र्थन्दर्शयति ॥श्रीराममितिविशुद्धहृदयोनिर्मलान्तः
करणः ॥यः कृतीपुण्यवान्विद्वान् ॥निर्मलयाकपटमलरहितया ॥ भक्त्याऽनुवृत्त्या ॥श्री

श्रीरामंसुरसङ्घसेवितपदंसङ्कल्पकल्पद्रुमम्भक्त्यानिर्मलयाविशु
द्धहृदयस्संसेवतेयः कृती॥ उच्चैस्सैरभवाहनस्पसुतरांस्थूलोग्रदं-
ष्ट्राभृतोगाढध्वान्तरुचेर्य्यमस्यसभवेत्किं भ्रातुनेत्रातिथिः ॥ ९ ॥

रामंश्रीदाशरथिम् ॥सम्यक्परमार्थबुद्ध्या ॥ सेवते॥ कृतीस्यात्पण्डितेयोग्ये ॥इतिमेदिनी
॥सकृती॥भ्रातुकदाचिदपि॥यमस्यशमनस्य॥नेत्रातिथिर्नयनविषयः ॥किम्भवेज्जाये
त् ॥नहीतिकाक्वाव्यारव्येयम् ॥शमनोयमराड्यमइत्यमरः ॥सद्यएवमुक्तत्वाद्यमसा
मीप्यमपिनगच्छेदित्यर्थः॥ कीदृशम् ॥सुराणामिन्द्रादिदेवानांसङ्घेनकदम्बेन॥सेविते
शरणीकृते ॥पदेचरणौयस्यतम्॥ नहि॥ अमृतपानेन ॥ दिवौकसाञ्जन्मसाफल्यमस्ती

For Private and Personal Use Only

तिध्वनितम् ॥ पुनः कीं० ॥ सङ्कल्पानाम्भक्तमनोरथानाम् ॥ कल्पद्रुमन्तत्पूरकतयासुर
तरुम् ॥ नहिरामसेवांविनामनोरथाऽवाप्तिरितिसूचितम् ॥ तदुक्तम् ॥ रेरीत्येतदसिद्धञ्चे
त्सिद्धञ्चेद्दशिञ्चेतिकिम् ॥ मनोरथः कथंसिद्ध्येद्रामचन्द्रकृपांविना ॥ १ ॥ कीदृशस्ययम
स्य ॥ उच्चैर्म्महानुन्नतोवा ॥ सैरिभोमहिषः ॥ वाहनंयस्यतस्य ॥ लुलायोमहिषोवाहद्विष-
त्कासरसैरिभाइत्यमरः ॥ पुनः कीं० ॥ सुतरामत्यन्तम् ॥ स्थूलास्सूक्ष्मेतराः ॥ उग्राअति

श्रीरामेणचराचरात्मकमिदंशन्नस्यासमुत्पाद्यते तत्सम्पादितकर्म्मरा
शिवशतस्सम्पाल्यतेञ्चध्रुवम् ॥ सानन्दञ्चयथावकाशमखिलंसं-
स्थाप्यतेस्वोदरे तत्तत्कार्यवशादनेकतनुनाभक्ताकृतस्यामहम् ॥ १० ॥

विकरालादुष्कातिभयप्रदाइत्यर्थः ॥ दंष्ट्राः ॥ विभर्त्तीतितस्य ॥ पुनः कीं० ॥ गाढध्वान्तोनि-
बिडान्धकारः ॥ तद्वत् ॥ रुचिः कान्तिर्यस्यतस्य ॥ एतद्विशेषणत्रयेण ॥ यमस्यातीवविक
रालरूपतादर्शिता ॥ श्रीरामसेवकोयमदर्शनदुःखमपि ॥ नानुभवति ॥ किमुतनरकदुः ख
मितिभावः ॥ ९ ॥ रामः करोतिविश्वस्यसृष्टिस्थितिलयांस्त्वया ॥ माययाऽनन्तमूर्त्तिस्त-
न्नित्याहदशमेकविः ॥ १ ॥ अथतृतीयार्थन्दर्शयति ॥ श्रीरामेणेति ॥ सृष्टौ ॥ येन ॥ श्रीरा- १०

मेण ॥ इदन्दृश्यमानम् ॥ चराचरात्मकञ्चेतनाचेतनात्मकम् ॥ विश्वञ्जगत् ॥ विश्वात्वतिवि
षायांस्त्रीजगतिस्यान्नपुंसकमितिमेदिनी ॥ शक्त्यास्वमहिम्ना ॥ समुत्पाद्यतेसृज्यते ॥ तत
श्चस्थितौ ॥ तैर्जगज्जीवैः ॥ सम्पादितास्समुपार्ज्जितायेकर्म्मराशयश्शुभाशुभक्रियाक
लापाः ॥ तद्वशतस्तदायत्तत्वेन ॥ ध्रुवमित्यलीके ॥ पाल्यतेयोगक्षेमाभ्यांरक्ष्यते ॥ तत- सं
श्चलये ॥ सानन्दंसाह्लादंयथास्यात्तथा ॥ नतुतद्भारासहिष्णुतयाऽतीवखेदखिन्नमित्य
र्थः ॥ अवकाशमनतिक्रम्येतियथावकाशम् ॥ नत्वतिसङ्कटमित्यर्थः ॥ स्वोदरेकोटिब्र
ह्मांडाश्रयेनिजजठरे ॥ संस्थाप्यतेनिधाप्यते ॥ तेनश्रीरामेण ॥ अहम् ॥ भक्तीकृत-
स्स्याम् ॥ अभक्तोभक्तःसम्पद्यमानस्तथाकृतइतिभक्तीकृतः ॥ कृभ्वस्तियोगेसम्पद्य
कर्त्तरिच्विरितिच्विः ॥ कीदृशेन ॥ तत्तत्कार्य्यवशात्सृष्टिस्थितिलयापत्त्यायत्तत्वात् ॥
अनेकावस्थः ॥ तनवोविधिहरिरुद्रविग्रहायस्यसत्तेन ॥ अनेनश्रीरामस्यसकलजग-
ज्जनकत्वादिकन्दर्शितम्भवति ॥ १ ॥ नमःकुर्वन्तिरामाययेसन्द्धामव्रजन्तिते ॥ पुण्यैः
किन्नियमैरन्यैरित्याहैकादशेकविः ॥ १ ॥ अथचतुर्थ्यर्थन्दर्शयति ॥ श्रीरामायेति ॥ यः
कश्चनापिपुमान् ॥ नतुत्रैवर्णिकएव ॥ कथमपिकेनापिप्रकारेण ॥ नतुभक्तिभावेनैव
॥ क्वापिकस्मिंश्चिदप्यवसरेसाङ्केत्यपरिहासहेलनादौयथालब्धप्रवेशप्रदेशेवा ॥ नतु

सङ्कटविशेषेगोमयादिविलेपनपरिशुद्धप्रदेशेवा ॥ स्वान्तेमनसि ॥ वहिरेववांतटस्थ
जनश्रवणाविषयतायांवा ॥ सकृदेकवारमपि ॥ मेमम ॥ नमःश्रीरामायास्तुभवतु ॥ इ ती
थम् ॥ प्रोच्चारयति ॥ सपुमान् ॥ अञ्जसाऽनायासेनैव ॥ नानाजन्मभिर्बहुविधैर्ज्जन्मभिः ॥
अर्ज्जितानिसम्पादितानि ॥ यान्यघानिपापानि ॥ तेषान्निकरात्समूहात् ॥ अघन्तुव्यसने
दुःखेदुरितेच्चनपुसकमितिमेदिनी ॥ मुक्तोविरहितस्तत्फलभोगपराङ्मुखइतियावत् ॥

**श्रीरामायनमोऽस्तुमेकथमपिक्कापीतियःकश्चनस्वान्तेवावहिरेववा**
**सकृदपिप्रोच्चारयत्यञ्जसा ॥ नानाजन्मभिरर्ज्जिताघनिकरान्मुक्तो-**
**विमुक्तीश्वरोदुष्प्रापन्तपसापरैश्चनियमैर्द्धामव्रजत्येवसः ॥ ११ ॥**

सन् ॥ पुनः ॥ विशिष्टायाःकैवल्यरूपायाः ॥ मुक्तेर्म्मोक्षस्य ॥ ईश्वरोनायकः ॥ तिरस्कृत-
पुनरावृत्तिश्चसन्नित्यर्थः ॥ धामसत्यलोकोपरिस्थंसान्तनिकाख्यंलोकम् ॥ व्रजतिप्राप्नोति
॥ कीदृशन्धाम ॥ तपसामनोरोधादिना ॥ मनोरोधःपरन्तपइत्युक्तेः ॥ यद्वा ॥ तपसास्वध-
र्म्माचरणेन ॥ स्वधर्म्माचरणान्तपइत्युक्तेः ॥ तथा ॥ परैरुत्कृष्टैर्यथाशास्त्रमाचरितैः ॥ नि
यमैश्शौचादिभिर्दशभिः ॥ यद्वा ॥ परैरन्यैः ॥ यमैश्चानृशंस्यादिभिर्दशभिरपि ॥ दुष्प्रापन्दु

र्लभम् ॥ यमाश्च नियमाश्च प्रोक्ताश्शान्तिपर्वणि भीष्मेण ॥ आनृशंस्यङ्क्षमासत्यमहिंसादम आर्ज्जवम् ॥ ध्यानम्प्रसादोमाधुर्य्यंमार्दवञ्च यमादश ॥ १ ॥ शौचमिज्यातपोदानस्वाध्यायोपस्थनिग्रहाः ॥ व्रतोपवासौमौनञ्चस्नानंचनियमादश ॥ २ ॥ भगवान्पतञ्जलिस्तु ॥ तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः ॥ शौचसंतोषतपस्स्वाध्यायेश्वरप्रणिधानानिनियमाइ-त्याह ॥ ११ ॥ रामाधिकोऽनुकम्पादौभुवनेऽस्तिनकश्चनभक्ताभीष्टप्रदोनैवेत्याह द्वादशकेक

श्रीरामादधिकोऽन्यकोऽस्तिभुवने कारुण्यपाथोनिधिर्दैर्य्यस्थैर्यगभ्भी
रतासुजनितासौशिल्यशौर्य्यादिभृत् ॥ ब्रह्मण्यश्चयशोधनस्सहृदयो-
मान्योवदान्योत्तमोनीतिज्ञोगुरुवत्सलोजितमनावन्दारुचिन्तामणिः ॥ १२ ॥

विः ॥ १ ॥ अथपञ्चम्यर्थन्दर्शयति ॥ श्रीरामादिति ॥ अत्रभुवनेऽखण्डब्रह्माण्डे श्रीरामाद्दा-शरथिकपटेनसर्वप्रसिद्धात्साक्षान्नारायणात् ॥ अन्यइतरः ॥ कः ॥ कारुण्यपाथोनिधिरस्तीत्यन्वयः ॥ नकोपीतिकाकुः ॥ तत्रपरदुःखासहनङ्करुणा ॥ करुणैवकारुण्यम् ॥ चतुर्वर्णादीनांस्वार्थउपसङ्ख्यानमितिस्वार्थेष्यञ् ॥ कारुण्यंकरुणाघृणेत्यमरः ॥ तस्यपाथोनिधिस्समुद्रः ॥ दयासागरइत्यर्थः ॥ पाथांसिजलानिनिधीयन्तेऽस्मिन्नितिपाथोनिधिः ॥ क

म्मर्णयधिकरणेचेतिनिपूर्वाद्धाजः किः ॥कबन्धमुदकम्पाथइत्यमरः ॥अथच ॥श्रीरामात्
॥ अधिकः ॥अन्यः ॥धैर्य्यादिभृच्चकः ॥नकोपीत्यर्थः काक्का ॥एवमग्रेऽपि ॥ तत्रधैर्यम् ॥अ
नर्थपरम्परोद्रेकेसत्यपिमानसाव्याकुलता ॥स्थैर्य्यञ्चापल्यराहित्यम् ॥गम्भीरताशत्रुप्रभृति
विहितंमहापकारमननुसन्धायमनोऽक्षोभ्यता ॥सुजनताप्रत्युपकाराभिलाषपराङ्मुखत्वे
नोपर्क्करिता ॥सौशील्यंलोकशास्त्राविरुद्धश्लाघ्यचरितत्वम् ॥शुचौतुचरितेशीलमित्यमरः
॥शूरस्यभावश्शौर्य्यम् ॥सङ्ग्रामोत्साहजीवातुः ॥गुणवचनब्राह्मणादिभ्यइतिष्यञ् ॥ अ-
थचश्रीरामात् ॥ अधिकोऽन्यः ॥ब्रह्मण्यादिः ॥वन्दारुचिन्तामणयन्तश्चकः ॥नकोपीत्यर्थः
तत्रब्रह्मभ्योवेदेभ्यः ॥हितोब्रह्मण्यः ॥वेदद्रुहौमधुकैटभाख्यावसुरौनिहत्य॥ वेदान् ॥
रक्षितवानितिश्रीमद्भागवतादौसुप्रसिद्धमेव ॥प्रलयपयसिधातुस्सुप्तशक्तेर्मुखेभ्यः श्रुति
गणमुपनीतम्प्रत्युपादत्तहत्वेत्यष्टमस्कन्धे ॥वेदद्रुहावतिबलौमधुकैटभाख्यावितिसप्तमे-
च ॥यद्वा ॥ ब्रह्मणिवेदेभवोब्रह्मण्यः ॥त्रयीप्रणिहितोधर्म्मः ॥सोऽस्यास्मिन्वाऽस्तीति ॥
अर्शआद्यजन्तः ॥ यद्वा ॥ब्रह्माणिवेदाः ॥ नानिसन्तियस्मिंस्तद्ब्रह्मब्राह्मणकुलम् ॥ त-
स्मैहितोब्रह्मण्यः ॥पलयवमाषातिलवृक्षब्रह्मणश्चेतियत् ॥वेदस्तत्त्वन्त पोब्रह्मब्रह्माविप्रः
प्रजापतिरित्यमरः ॥पुनः ॥यशएवकीर्त्तिरेव ॥धनन्द्रविणंयस्यसयशोधनः ॥ यशः

कीर्तिस्समज्ञाचेत्यमरः ॥ धनन्तुगोधनेवित्ते ॥ इतिमेदिनी ॥ स्वकुलोचितधर्म्मपालकः ॥
यशोधनानांहियशोगरीयइत्युक्तेः ॥ पुनः ॥ सहहृदयेनसहृदयः ॥ तेनसहेतिबहुव्रीहिः
॥ वोपसर्ज्जनस्येतिसहस्यसादेशः ॥ सत्वैकप्रधानमनाः ॥ वैषम्यविरहितोवा ॥ सर्वत्रनिगमा
गमादौसर्वदेवानीवपरिपक्वावबोधोवा ॥ पुनः ॥ मान्यस्सर्वेषांसानुरागम्पूज्यः ॥ पुनः ॥ वदा
न्याबहुप्रदास्तेषूत्तमोवाञ्छितार्थाधिकप्रदइत्यर्थः ॥ तेभ्यस्तेषान्तेष्वितिपञ्चमीषष्ठीसप्त-
मीभिस्समासः ॥ यद्वा ॥ वदान्याश्चारुवादिनः ॥ तेषूत्तमः ॥ स्मितपूर्वाभिभाषीत्यर्थः ॥ वदा
न्योदानशौण्डेस्याच्चारुवादिनिचान्यवदिनिमेदिनी ॥ पुनः ॥ नीतिः परोच्छित्तिपूर्वकस्वोत्त
रोत्तराभ्युदयसंवलितदण्डार्हदण्डदानादिरूपा ॥ ताम् ॥ जानातितत्तत्स्थलतत्तत्प्रयोगसा
फल्यविधानतया ॥ वेत्तीतिसतथोक्तः ॥ पुनः ॥ गृणन्तिहिताहितमुपदिशन्तीतिगुरवोहि
ताहितोपदेष्टारः ॥ तेषांवत्सलस्स्निग्धः प्रियइतियावत् ॥ यद्वा ॥ तेवत्सलायस्यसः ॥ स्नि
ग्धस्तुवत्सलइत्यमरः ॥ पुनः ॥ जीतंस्वायत्तीकृतम् ॥ मनोयेनसः ॥ जितेमनसिसर्वेन्द्रिय
जयस्यस्वतस्सिद्धत्वात् ॥ जितेन्द्रियवर्गएकपत्नीव्रतधरइत्यर्थः ॥ इन्द्रियेशम्मनस्स्मृत
मित्युक्तेः ॥ इन्द्रियेशमनोजिष्णोः श्रीरामस्याखिलेन्द्रियविजेतृत्वंसूचितम् ॥ पुनः ॥ व
न्दारूणामभिवादकानाम् ॥ चिन्तामणिरिवेतिसः ॥ तदिच्छापूरकइत्यर्थः ॥ वन्दारुरभि

वादकइत्यमरः ॥ अत्रषोडशभिः पदैः ॥ श्रीरामस्यषोडशकलत्वसूचनपूर्वकमूलरामायणप्रतिपादितगुणनिकरवर्णनव्याजेन ॥ स्वानुरागातिशयोदर्शितः ॥ १२ ॥ सिद्धयोनिधयोदासास्तस्यस्युर्यश्चविन्दति ॥ कृपाकटाक्षंरामस्येत्याहपद्येत्रयोदशे ॥ १ ॥ अथपद्यार्थन्दर्शयति ॥ श्रीरामस्येति ॥ सञ्जातः प्रादुर्भूतः ॥ भाग्योदयो ऽदृष्टसम्मुखीभावो यस्यस तादृशोयः कोऽपिपुमान् ॥ श्रीरामस्याखिलभुवननायकस्यश्रीविष्णोर्दाशरथिरूपेणाव

श्रीरामस्यकृपाकटाक्षमिहयस्सञ्जातभाग्योदयस्सम्प्राप्नोतिशचीपति
प्रभृतयोवाञ्छन्तितस्यैवतम् ॥ अष्टौवानवसिद्धयश्चनिधयस्संयान्ति
तद्दासतांलोकानाञ्जनिरक्षणक्षयविधौशक्तोभवत्येवसः ॥ १३ ॥ ॥

तारस्य ॥ कृपाकटाक्षङ्करुणारसमसृणापाङ्गावलोकनम् ॥ अपाङ्गोनेत्रयोरन्तौकटाक्षोऽपाङ्गदर्शनेइत्यमरः ॥ इहलोके ॥ विशिष्टोपासनावशात् ॥ सम्प्राप्नोति ॥ तत्कृपापात्रीभवति ॥ तस्यैवनान्यस्य ॥ तत्कृपाकटाक्षम् ॥ शचीपतिप्रभृतयः पौलोमीवल्लभाद्यादेवाः ॥ मामयंविलोकयत्विति ॥ वाञ्छन्त्यभिलषन्ति ॥ यद्वा ॥ एवकारोभिन्नक्रमः ॥ ततः ॥ वाञ्छन्त्येवेत्यर्थः ॥ अथच ॥ यथासङ्ख्योपदेशात् ॥ अष्टौसिद्धयोऽणिमाद्याः ॥ नवनिधयोमहाप-



For Private and Personal Use Only

ष्माद्याश्च ॥ नस्य ॥ दासाश्चदासाश्चदासाः ॥ पुमान्स्त्रियेत्येकशेषः ॥ तेषाम्भावस्तत्तात मृ ॥ भृत्यत्वमित्यर्थः ॥ संयान्ति ॥ सर्वथैवतदायत्ताभवन्तीतिभावः ॥ सिद्धयोनिधयश्चो-क्ताश्शिष्टैः ॥ अणिमामहिमाचैवगरिमालघिमातथा ॥ भूतिः प्राकाम्यमीशत्वंवशित्वञ्चा-ष्टसिद्धयः ॥१॥ महापद्मश्चपद्मश्चशङ्खोमकरकच्छपौ ॥ मुकुन्दकुन्दनीलाश्चखर्वश्चनिधयो नव ॥ २ ॥ इति ॥ अथच ॥ सः ॥ लोकानाम्भुवनानामृ ॥ लोकोजनेनचभुवनेइत्यमरः ॥ जनिरस्त

श्रीरामे त्रिदशोत्तमेधृतशमेविज्ञानदानक्षमेत्रैगुण्योपरमेवशीकृत
रमेनित्यस्फुरत्स्थैर्यमे ॥ सर्वापद्विगमेऽभिधायिनिगमेहृष्यत्क्षमेसतक्षमे
रक्षोवंशदमेमनोहरतमेसप्रीतिचेतोऽस्तुमे ॥ १४ ॥ ॥ ॥ ॥

पास्त्यविधौ ॥ सृष्टिस्थितिभङ्गविधाने ॥ शम्भोः तीवसमर्थोभवत्येवेत्यलम् ॥ १३ ॥ अपार कर्म्मण्युद्विग्नम्मानारूढम्मनोमम ॥ श्रीरामेऽस्तुसभक्तीत्थमाहपद्येचतुर्दशे ॥ १ ॥ अथस म्यर्थन्दर्शयति ॥ श्रीरामेइति ॥ श्रीरामेश्रीदाशरथौपरमात्मनि ॥ सप्रीतिसभक्ति ॥ मेमम ॥ चेतोमनोऽस्तुभवतु ॥ अन्यत्रसर्वत्रदृश्यादृश्यपदार्थेविनश्वरबुद्ध्या ॥ तत्रदेशकालवस्तु-परिच्छित्तिशून्यत्वनिश्चयेन ॥ अतीवसंसक्तमस्त्वित्यर्थः ॥ कीदृशे ॥ तृतीयायौवनाख्या ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशाऽवस्थायेषान्तेतथोक्ताः ॥सङ्ख्याशब्दस्यवृत्तिविषयेपूरणार्थत्वम् ॥ त्रिभागश्चतुर्भा
गइत्यादिवत् ॥त्रिर्दशय ॥सङ्ख्ययाव्ययेतिबहुव्रीहिः॥ बहुव्रीहौसङ्ख्येयेतिडच् ॥जन्मसत्ता
विनाशार्व्यस्तित्वोदशायेषामितिवा॥ दशाऽवस्थादीपवर्त्योर्वस्थान्तेभूम्नियोषितीतिमे-
दिनी॥ तेषूत्तमस्तस्मिन् ॥देवदेवइत्यर्थः ॥पुनः ॥ धृतश्शमोमनोनैश्चल्यंयेनतस्मिन् ॥पुनः
विज्ञानम् ॥ जन्ममरणाद्यनेकविधापारदुःखपारावारसंसारनिवर्तनक्षमम्ब्राह्मौपनिषदम्
॥ यद्वा ॥ मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्रयोरित्यमरोक्तेः ॥ विश्वकर्म्मप्रणीतशि
ल्पविद्यानिबन्धशिक्षादिशास्त्रपारङ्गमत्वम् ॥ तस्यदानेवितरणे॥ क्षमस्समर्थः ॥सोत्सा
हइतियावत् ॥ तस्मिन् ॥सर्वान्तरात्मत्वादत्रसुघटमेवसर्वम् ॥ रामगीतादौतुस्फुटतरमि
त्यलम् ॥ पुनः ॥ त्रिभिर्ग्गुणैस्सत्वरजस्तमोभिर्निष्पन्नञ्जगत् ॥ उपरमयतीतितस्मिन् ॥सं
सारनिवर्त्तकेइत्यर्थः ॥ यद्वा ॥ उपरमणमुपरमः ॥घञर्थेकविधानमितिकोरमधातोर्भावे॥
त्रैगुण्यात्त्रिगुणात्समायैककार्य्यात्संसारात् ॥उपरमउपरमणमौदासीन्यंयस्यसतस्मिन्॥
निर्गुणइत्यर्थः ॥ पुनः ॥यतः वशीकृतास्वायत्तीकृता ॥रमालक्ष्मीर्येनसतस्मिन्॥ निरञ्जन
इत्यर्थः ॥पुनः ॥नित्यास्सर्वकालैकरसाः ॥स्फुरन्तः॥ उत्तरोत्तरंसमृद्धिशालिनः ॥ सँयमाय
स्मिन्सतस्मिन् ॥यद्वा ॥ नित्यंसर्वदा॥ नतुकदाचित् ॥ स्फुरन्तस्समुन्मीलन्तः ॥ सँयमा-





For Private and Personal Use Only

मनोनिरोधादिलक्षणायस्मिन्सतस्मिन् ॥ पुनः ॥ सर्वासामापदाम् ॥ विगमोविनाशोय
स्मात्सतस्मिन् ॥ भक्तापन्निवारकइत्यर्थः ॥ पुनः ॥ अभिधार्थिनोवाचकाः स्वरूपनिरूपण
कर्तारोनिगमावेदायस्यतस्मिन् ॥ निगमोवाणिजेपुर्य्यांकूटेवेदेवणिक्पथेइतिमेदिनी-
॥ पुनः ॥ स्वर्थन्नीसन्तुष्टाक्षमाभूमिर्येनसतस्मिन् ॥ दुष्टभारवतारेणमुदितीकृतभूलोक
इत्यर्थः ॥ क्षितिक्षान्त्योःक्षमेत्यमरः ॥ पुनः ॥ सतीनिरुपाधिका ॥ क्षमाक्षान्तिर्यस्मिन्सत

श्रीरामत्वमसिप्रभुर्म्ममगुरुर्म्मातापितावान्धवोदातायोजयिता-
विपद्दमयिताविष्णुर्विरिञ्चिर्हरः ॥ भूरापोमरुदग्निरम्बरमपित्वंशी
तरश्मीरविस्स्थूलंसूक्ष्ममिदन्त्वमेवसकलंसर्वात्मनेतेनमः ॥१५॥

स्मिन् ॥ पुनः ॥ रक्षोवंशान्राक्षसकुलानिदमयतीतितस्मिन् ॥ पुनः ॥ अतिशयेनमनोहरोमनोहरस्तं मस्त
स्मिन् ॥ लोकोत्तरलावण्यइत्यर्थः ॥ अत्रद्वादशभिर्विशेषणैर्द्वादशमासिकदुरितनिरसनंसूचितम् ॥
१४ ॥ मातापितागुरुर्दाताप्रभुर्विष्णुर्विधिर्हरः ॥ सर्वात्मारामचन्द्रोऽयमितिपञ्चदशेऽब्रवीत् ॥ १ ॥ अथसम्नु
ष्टिन्दर्शयति ॥ श्रीरामेति ॥ हेश्रीराम ॥ त्वम् ॥ मम ॥ प्रभ्वादिरूपोऽसीत्यन्वयः ॥ तत्र ॥ प्रभुरधिपः
॥ सर्वस्मिन्कार्य्यजातेप्रेरकः ॥ सर्वसमर्थः ॥ सर्वथामान्योवेत्यर्थः ॥ गुरुस्सर्वेभ्योऽधि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोमहत्परिमाणम्॥ हिताऽहितोपदेष्टा ॥अध्यापकरूपोवापीत्वमेवेत्यर्थः॥संस्कृतैः
प्राकृतैश्चैवगद्यपद्याक्षरैस्तथा ॥देशभाषादिभिश्शिष्यम्बोधयेत्सगुरुस्स्मृतः॥१॥
मान्यतेमनोवाक्कायकर्म्मभिः पूज्यते॥ इतिमाता॥ मातिवास्वगौरवेणात्मजस्हृदयेसा-
माता ॥मातिगर्भोऽस्यामितिवामाता॥ तद्रूपोऽपित्वमेवासीत्यर्थः॥नप्तृनेष्टृतिसाधुः
॥पातीतिपिता॥ मातृवत्साधुः॥आधिव्याधिभ्यांरक्षिताऽपिममत्वमेवासीत्यर्थः॥ ब-
ध्नातिस्ववर्णाश्रमानुरूपव्यापारेयोजयतीतिबन्धुः॥स्मृस्वृस्निहीत्युः॥ बन्धुरेवबान्ध
वः॥प्रज्ञादित्वादण्॥ सोऽपित्वमेवेत्यर्थः॥दातासकलाभिलषितप्रदोऽपित्वमेव॥यो
जयिताविरहादिभरनिवारकोऽपित्वमेव॥विपदांनानाविधापत्तीनाम्॥दमयिताऽपहा
रकोऽशेषदुर्गतिनिवारकोऽपित्वमेव॥ तथाचोक्तम्॥ आपदामपहर्तारन्दातारंसर्वसम्प
दाम्॥लोकाभिरामंश्रीरामम्भूयोभूयोनमाम्यहम्॥१॥अथश्रीरामस्यसर्वात्मतान्द
र्शयति॥विष्ण्वादिरूपोऽपित्वमेवासीत्याह॥विष्णुर्न्नारायणः कोटिब्रह्मांण्डपालनश-
क्तः॥ विरिञ्चिरखिलविश्वजनकोब्रह्मदेवः॥हरस्सकलजगद्विलयाधिकारैकबद्धपरि-
करोरुद्रः॥नानाविधावतारसृष्टिरत्नखनिसुरासुरनरादिनमस्कृतोऽनन्ताऽखण्डातु
लवैभवःश्रीशङ्करोवा॥भूर्भूमिः॥आपोजलानि॥मरुत्॥सर्वंजगज्जीवातुःपवनः॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्निस्सर्वोपकारैकप्रवणहृदयः पावकः ॥अम्बरमाकाशः ॥शीतरश्मिस्सकलचेतनाचेतनजीववर्ग
प्रल्हादजनकश्चन्द्रः॥रविरखण्डब्रह्माण्डप्रकाशकः श्रीभगवान्मार्तण्डः ॥ स्थूलन्दृश्यम् सूक्ष्मम
दृश्यम्॥कार्यङ्कारणंवाजगज्जगत्त्वेनपरिणतमित्यर्थः॥त्वमेवेत्यर्थः ॥किम्बहुना॥सकलमशेषञ्च
राचरात्मकम् ॥इदंविश्वम्॥ त्वमेव॥ सर्वंविष्णुमयञ्जगदितिश्रुतेः॥अतस्सर्वेषामुक्तानुक्तानाम्॥आ
त्मास्वरूपः॥तस्मै॥तेतुभ्यम्॥नमः॥अस्त्वितिशेषः॥त्वमेवाखिलदेवतादिस्वरूपेण॥ तत्तद्देवतासमर्च्चके
भ्यस्तत्तत्फलप्रदानकुशलोऽसीतिभावः ॥उक्तञ्च श्रीमद्भगवद्गीतायाम् योयोयायान्तनुम्भक्तः श्रद्धया
ऽर्चितुमिच्छति॥ तस्यतस्याचलांश्रद्धान्तामेवविदधाम्यहम् ॥१ ॥सतयाश्रद्धयायुक्तस्तस्याराधनमीह
तेलभतेचततःकामान्मयैवविहितान्हितान्॥ २॥पद्मपुराणेऽपिसौराश्शैवाश्चगाणेशावैष्णवाः शक्ति
चिन्तकाः॥सर्वेमाम्प्रपद्यन्ते वर्षाम्भस्सागरंयथा॥ ३॥अत्रयानिपञ्चदशसङ्ख्याकानिशार्दूलविक्री
डितानिच्छन्दांसि॥ तल्लक्षणन्तु॥ सूर्य्याश्वैर्म्मसजस्ततास्सगुरवश्शार्दूलविक्रीडितमितिज्ञेयम् ॥
१५ ॥रामपञ्चदशीपाठफलश्रवणमुज्ज्वलम् ॥उक्तवान्षोडशेपद्येलक्ष्मीनारायणस्सुधीः॥ १ ॥प्रब
न्धसमाप्तिंसूचयन्॥एतत्पाठफलम्॥पुष्पिताग्रावृत्तेनाह॥ तल्लक्षणन्तु॥अयुजिनयुगरेफतोयकारो-
युजिचनजौजरगाश्चपुष्पिताग्रेति॥रघुपतीति॥उदारामहती॥बुद्धिर्मनीषायस्यसः ॥उदारोदातृम
हतोरित्यमरः॥नादृशोयोजनः॥रघूणांरघुवंश्यानाम् ॥पतिःपरिवृढः॥सतथोक्तःश्रीरामः॥तद्राजत्वा

For Private and Personal Use Only

इह्रुष्वणोलुक्॥तस्यरुच्चयेऽभिप्रीतये॥निजोद्धाराभिलाषायेत्यर्थः॥रोचते॥रुच्चृदीप्तावभिप्रीतोच
॥इगुपधात्किदितीन्॥रुचिस्त्रीदीप्तोशोभायामभिषङ्गाभिलाषयोरितिमेदिनी॥इत्येतांरामपञ्चदशीरूपाम्
रघुपतिनुतिंश्रीरामचन्द्रस्तुतिम्॥पठेदुच्चारयेत्॥रघुपतिपादयोश्श्रीरामचन्द्रचरणयोः॥सम्यङ्निर्दम्भ
तया॥शास्त्रोक्तविधिनावा॥अर्चनेनपूजनेन॥आप्तासमर्धीगता॥ऋद्धिर्जन्मजन्मान्तरानेकविधदुरित
राहित्यरूपापावनतायेनसतथोक्तः॥सुरैर्विधिशक्रादिभिर्देवैः॥नुतस्स्तुतस्सन्॥सजनः॥रघुपतिधा

रघुपतिनुतिमित्युदारबुद्धीरघुपतिपादसमर्च्चनाप्तऋद्धिः रघुपतिरुच्चयेजनःपठे
द्योरघुपतिधामनुतःसुरैस्सगच्छेत्॥१६॥इतिश्रीमत्कौशल्यगोत्रोद्भवसारस्वतकु
लतिलकसकलविद्यारत्नरत्नाकरश्रीमत्पण्डितठाकरदत्तशर्म्मान्तेवासिलक्ष्मी·
नारायणाह्वयकविवरविरचितंश्रीरामपञ्चदशीस्तोत्रंसम्पूर्णतामगमत्तराम्॥ ॥

मसत्यलोकोपरिस्थंसान्तनिकाख्यंलोकम्॥गच्छेत्प्राप्नुयात्॥यद्वा॥रघुपतेरामावतारस्यश्रीविष्णोः
धामस्वरूपलक्षणन्तेजःगच्छेल्लभेत्॥सारूप्यरूपांमुक्तिंप्राप्नुयादित्यर्थः॥स्याद्धामतेजोगृहयोर्द्धामे-
त्यमरमाला॥इतिसर्वंसमञ्जसमेवेत्यलम्॥१६॥साकेतामर वैरिदिग्गजविधुक्रोशेकसारीतिसन्
ग्रामःश्रीशरदारसिंहनृपतेःपूर्वोद्भवैर्वासितः॥गोमत्यम्बुजमन्दिरापतिपदीकल्पोपकण्ठेनदीकामास्ता १६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगदम्बिकात्वबहिरुद्यानेऽस्तियस्योत्तरे॥१॥श्रीगर्ग्गान्वयमण्डनंसमभवत्तत्रापरोवाक्पतिर्ज्योतिर्विस्सु
कुलोपनामसहिताऽऽनन्दीबुधानन्दकः॥नानातन्त्रसरोजवासरमणिर्ग्गङ्गाजलस्वच्छहृद्देहीवदनाम्बुज
लितटिनीपारीयविप्राग्रिमः॥२॥तस्मात्कुन्दमतिश्वराद्वरगुरोर्न्नारायणस्याभवत्पादाम्भोजसमर्च्चनात्तवि-
भवोधीरस्तुतोविश्रुतः॥रामान्तोगिरिजादिकःशिवकरोयोऽनेककृत्वोभुवस्तीर्थानिव्यचरद्विदेहतनया
प्राणप्रियप्रीतये॥३॥तत्पुत्रेणसभावमिन्दुकरगोभूसम्मिते१९२१हायनेभौमेपौषसितेषडाननति
थौ६श्रीरामपादेन्दुना॥जन्मग्रामसमुद्भजेनविलसद्वैरम्बसत्सत्तनाकाशोल्लासभरेणरामचरणाम्भो
जातमत्तालिना॥४॥सीतानाथपदेनभीहरपुराम्भोधिप्रसूतेन्दिरालक्ष्मीवल्लभचन्द्रशङ्करपुराका
शोदितोत्त्याकृता॥यावद्रामकथासुधावनितलेतावद्बुधानांमुदेभूयात्स्वीरघुवीरपञ्चदशिका
व्याख्याकलापालिका॥५॥इतिश्रीसरयूतटस्थगणेशपुरनिवासिश्रीरामचरणसरोजालि
पण्डितवररामचरणविरचिताश्रीमल्लक्ष्मीनारायणाभिधकविवरविरचितरामपञ्चदशीस्तोत्र
व्याख्याकलापालिकाख्यासम्पूर्णतामगमत्तरांसुतराम्॥श्रीमत् कविवरलक्ष्मीनारायणा
ज्ञानुसारेण इदंपुस्तकं जयाशंकरात्मजेनश्रीधरशर्मणा मुंबापुर्यांजगदीश्वरशिलायंत्रेमुद्रा
पितं॥ शकाब्दः१८०७ इमांच१८६७ संख्याकराजनियमस्य २५ संख्यांशानु-
सारेणलेखारूढं कृत्वा ग्रंथकर्या सर्वेऽधिकाराः स्वाधीनाः स्थापिताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥इतिरामपञ्चदशीसटीकसमाप्तः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only